# संस्कृतवार्ताः

**दिनाङ्क : 28.07.2025** **सायम् - 06:20**

**आदौ-मुख्यवार्ताः**

- **ऑपरेशन-सिंदूर इत्यस्य विषये अद्य लोकसभायां विशिष्टा चर्चा अभवत् । सर्वकारेण सेनायाः प्रदर्शनं प्रशंसितम् ।**
- **सर्वोच्चन्यायालयेन अद्य कल्कत्ता-उच्चन्यायालयस्य अन्य-अप्रगतिशील-वर्गाणां संशोधितसूच्याः कार्यान्वयनस्य अन्तरिम-आदेशः स्थगितः ।**
- **हरवानक्षेत्रे महादेव इत्यभियानस्य अन्तर्गतं सुरक्षाबल सह द्वन्द्वे त्रयः आतङ्कवादिनः मारिताः ।**
- **स्वीडन्-देशस्य राजधान्यां स्टाक्होम्-नगरे अमेरिका-चीन-देशयोः मध्ये नूतन-व्यापार-वार्ता अद्य आरप्स्यते**
- **दिव्या-देशमुखः FIDE महिला-विश्व-चषके कोनेरु-हम्पी इत्येतां पराजित्य ग्रैंडमास्टर इति सम्मानं अध्यगच्छत् ।**

---------------------------------------------------------

**लोकसभा-सिन्दूराभियानम्**

सद्य एव पहलगाम इत्यत्र जातं आतङ्किप्रकरणं विरुध्य भारतस्य सैन्यप्रतिक्रियायाः ऑपरेशन-सिंदूर इत्यस्य विषये अद्य लोकसभायां विशिष्टा चर्चा अभवत् । रक्षा-मंत्री राजनाथसिंहः प्रोक्तवान् यत् ऑपरेशन-सिन्दूर इति अभियानेन पाकिस्तानाय स्पष्टः संदेशः प्रेषितः अस्ति यत् आतङ्केन सह शान्तिवार्ता न चलिष्यति अस्मिन्नेव क्रमे तेन अवधीरितं यत् प्रत्युत्तरप्रदाने पाकिस्तानस्य शताधिकाः आतङ्किनः मारिताः नव आतङ्किस्थानकानि अपि नष्टानि अभवन् ।श्रीसिंहः पाकिस्तानम् अवरोद्धुं एस-400 ,आकाश चेत्यादीनां प्रणालीनां उपयोगं कर्तुं सशस्त्रबलानां प्रशंसां कुर्वन् प्रोक्तवान् यत् अस्माकं कीदृशी अपि महत्वपूर्णा भारतीया सम्पत्तिः क्षतिग्रस्ता नाभवत् सहैव तेन प्रोक्तं यत् संघर्षविरामे कस्यापि बाह्यदेशस्य हस्तक्षेपः नासीत् । सिंहेन पाकिस्तानस्य उपरि आरोपः प्रख्यापितः यत् पाकिस्तानेन आतंकवादः स्वकीया राज्य-नीतिरूपेण स्वीकृतः अस्ति सहैव तेन कथितं यत् प्रधामन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भारतेन पाकिस्तानं विरुध्य कठोराचरणं कर्तुं निर्णयः स्वीकृतः अस्ति ।

---------------------------------------------------------

**सर्वोच्चन्यायालयः-ओ. बी. सी.**

सर्वोच्चन्यायालयेन अद्य कल्कत्ता-उच्चन्यायालयस्य अन्तरिम-आदेशः स्थगितः, येन पश्चिमबङ्गाल-सर्वकारेण अधिसूचितायाः (ओ. बी. सी.) अन्य-अप्रगतिशील-वर्गाणां संशोधितसूच्याः कार्यान्वयनं स्थगितम् । भारतस्य मुख्यन्यायाधीशेन बी.आर्-गवयिवर्येण, न्यायमूर्तिः के. विनोद् चन्द्रन् इत्यनेन, न्यायमूर्तिः एन् वी अञ्जारिया इत्यनेन च पश्चिमबङ्ग-सर्वकारेण प्राख्यापितायाः विशेष-अनुमति-याचिकायाः विषये सूचना-निर्गमने स्थगनादेशः पारितः । सर्वोच्चन्यायालयः उच्चन्यायालयस्य तर्कं प्रति आश्चर्यं प्रकटितवान् यत् केवलं विधायिका ओ. बी. सी. इति अन्य-अप्रगतिशील-वर्गाणां वर्गीकरणं अनुमोदयितुं अधिकारं धारयति , एतत् स्पष्टीकृत्य यत् आरक्षणं कार्यकारि-क्षेत्राणां परिधौ अन्तर्भवति। मुख्यन्यायाधीशः गवयिवर्यः उच्चन्यायालयस्य टिप्पण्याम् असहमतिं प्रकट्य अकथयत् यत् राज्येण द्वाविंशत्युत्तर-द्विसहस्रतमाब्दस्य अधिनियमे संशोधनं कर्तुं स्वकीयायां अनुसूच्यां नवाः कक्षाः योजयितुं च सूचनाप्रपत्रस्य प्रस्तुतीकरणं विधानमण्डलसमक्षं विधेयकस्य प्रस्तुतीकरणं च आवश्यकरूपेण विधातव्यम् आसीत् । अवधेयं यत् कलकत्ता-उच्च-न्यायालयेन जूनमासस्य सप्तदशदिनाङ्के ओबीसी-ए , ओबीसी-बी इत्यनयोः समूहयोः चत्वारिंशदधिकैकशतं उप-श्रेणिभ्यः राज्येण प्रकाशिताः आरक्षण-संबंधाः अधिसूचनाः स्थगिताः आसन् । शीर्ष-न्यायालयः सप्ताहद्वयाभ्यन्तरं प्रकरणे अस्मिन् कार्याचरणं विधास्यति ।

---------------------------------------------------------

## जम्मूकश्मीर-सङ्घर्षः

श्रीनगरस्य हरवानस्य लिडवासक्षेत्रे अद्य महादेव इत्यभियानस्य अन्तर्गतं सुरक्षाबलैः सह द्वन्द्वे त्रयः आतङ्कवादिनः मारिताः इति भारतीयसेनया X इत्यत्र प्रकाशिते संदेशे प्रोक्तम्।अभियानेन सह अन्वेषणम् अधुनापि प्रचलति। कश्मीरस्य आरक्षि-महानिदेशकेन आकाशवाण्या सह संवादे प्रोक्तं यत् हतानाम् आतङ्कवादिनाम् अभिज्ञानम् अधुनापि न अभवत्।

---------------------------------------------------------

## अमेरिका-चीन वार्ताः

अद्य स्वीडन्-देशस्य राजधान्यां स्टाक्होम्-नगरे अमेरिका-चीन-देशयोः मध्ये नूतन-व्यापार-वार्ता आरप्स्यते। वार्तायाः अस्याः नेतृत्वं अमेरिकादेशस्य वित्तसचिवः स्काट्-बेसेण्ट्, चीनदेशस्य उपप्रधानमन्त्री हे-लिफेङ्ग् च करिष्यतः। विश्वस्य द्वे बृहत्तमे अर्थव्यवस्थे स्वकीययोः वर्तमान-व्यापार-सङ्घर्ष-विरामम् इतोऽपि नवति-दिनानि यावत् विस्तारयितुं सहमते भवितुं शक्नुतः स्म। विद्यमानस्य सङ्घर्षविरामस्य समाप्तिः अग्रिमे मासे द्वादश-दिनाङ्के भविष्यति। सङ्घर्ष-विरामस्य समये उभयदेशौ परस्परं शुल्कं अस्थायीरूपेण न्यूनीकर्तुं सहमतौ अभवताम् । वाशिङ्गटन इत्यनेन ह्यः यूरोपीयसङ्घेन सह, सद्यः एव जपान्-देशेन सह च व्यापार-सन्धिः कृता अस्ति।

---------------------------------------------------------

## पञ्जाब्-नवमृतकाः

पञ्जाबराज्ये मनक्वाल-ग्रामात् नवविंशति-सङ्ख्याकान् तीर्थयात्रिकान् वहत् अतिभारयुक्तं वाहनं लुधियाना-नगरस्य सरहिन्द्-केनाल् इत्यत्र पतितम् । अस्यां घटनायां द्वाभ्यां बालकाभ्यां तिसृभिः महिलाभिः च सह षट् जनाः मृताः अपि च नवदशजनाः सुरक्षोद्धारकार्यपूर्वकं रक्षिताः, यद्यपि चत्वारः यात्रिणः अधुनापि लुप्ताः सन्ति। लुधियाना-नगरस्य उपायुक्तः हिमांशुजैनः अवदत् यत् एषः समूहः धार्मिकस्थलात् प्रत्यागतः आसीत्, अन्वेषणकार्यम् अपि द्रुतगत्या प्रचलति। अत्रान्तरे, अन्यायां घटनायां, जलन्धर्-नगरस्य स्थानीय-नागरिक-चिकित्सालये प्राणवायु-संयन्त्रे तान्त्रिक-दोषेण पञ्च रोगिणां प्राणवायोः अनापूर्तिकारणेन मृत्युः अभवत् । एकस्य रुग्णस्य स्थितिः गम्भीरा अस्ति। राज्यस्य स्वास्थ्यमन्त्री बल्बीर-सिंह-वर्यः चिकित्सालयं गत्वा चतुर्विंशतिहोराभ्यन्तरं अन्वेषणं विधातुं आदेशं दत्तवान्, प्रकरणेस्मिन् प्रतिवेदनं च याचितवान्।

-----------------------------------------------------------

**जम्मूकश्मीरः-अमरनाथ यात्राः**

जम्मू-कश्मीरे अस्य मासस्य , तृतीये दिनाङ्के समारब्धायाः यात्रायाः अनन्तरं सप्ततिसहस्राधिक-त्रिलक्ष-मितताः अधिकाः तीर्थयात्रिणः प्रवर्तमानां अमरनाथयात्रां कृतवन्तः। श्रीनगरस्य दशनामी-अखाडा-भवनस्य अभ्यन्तरे श्री अमरेश्वर-मन्दिरे ह्यः 'चारि-स्थापना' इति समारोहः आयोजितः आसीत्। श्वः, तस्मिन् एव मन्दिरे 'नागपञ्चमी' इति दिवसे 'छारी-पूजनम्' आचरिष्यते, तथा च छारी-मुबारक् इत्यस्य अन्तिमा यात्रा आगस्त-मासस्य चतुर्थे दिनाङ्के पवित्र-गुहा-तीर्थं प्रति आरप्स्यते। श्रीनगरनगरस्य बुद्शाह-चौक-क्षेत्रे स्थितस्य दशनामी-अखाडा-भवनस्य अमरेश्वर-मन्दिरे परम्परागतरूपेण 'चारी-मुबारक' इति स्थीयते।

-----------------------------------------------------------

**गरिष्ठोद्योगः -श्यामा प्रसाद मुखर्जी**

गरिष्ठ-उद्योग-मन्त्रालयेन अद्य डॉ. श्यामाप्रसाद-मुखर्जीवर्यस्य पञ्चविंशत्यधिकैकशत-तम्याः जन्मजयन्त्याः अवसरः राजधान्यां विशेषेन भाषणेन आचरितः । राज्यमन्त्री भूपतिराजु श्रीनिवासवर्मा, संविधानसभायां मुखर्जीवर्यस्य भूमिकां प्रकाशयन्, भारतस्य औद्योगिक-संस्थागत-विकासे तस्य योगदानस्य प्रशंसाम् अकरोत्। वर्मा-वर्यः "एकराष्ट्रं, एकसंविधानम्" इत्यस्य आदर्शाणां मूर्तरूपम्, विद्वान्, राजनीतिज्ञः, निर्भीकः ,संसदसदस्यः, शिक्षाविदः च इत्यादिभिः अलङ्कारैः तस्य प्रशंसाम् अकरोत्। मुखर्जीवर्यस्य उत्तराधिकारस्य सम्मानं कुर्वन् लघुचलच्चित्रम् अपि प्रदर्शितम्।

-----------------------------------------------------------

**मिस्री-जापानः**

विदेशसचिवः विक्रममिसरी अद्य नवदिल्ल्यां जपान-देशस्य विदेशप्रकरणानाम् उपमन्त्रिणा ताकेहिरो-फुनाकोशी इत्यनेन सह मेलनम् अकरोत्। उभयपक्षौ रक्षा-सुरक्षा, आर्थिक-सुरक्षा, व्यापार-निवेशः, प्रौद्योगिकी,आदान-प्रदानम् चेत्यादीन् विषयान् समेत्य भारत-जपानयोः द्विपाक्षिक-सम्बन्धानां विषये अपि विचाराणाम् आदान-प्रदानम् अकुरुताम्। वैश्विकानां क्षेत्रीयाणां च महत्त्वपूर्णेषु विषयेषु

अपि तौ मतानां आदानप्रदानम् कृतवन्तौ । श्रीमिस्री, तस्य समकक्षी च भारत-प्रशान्तप्रदेशे तथा बहिः च शान्तेः, समृद्धेः, स्थिरतायाः च कृते भारत-जपान् विशेष-सामरिक-वैश्विक-सहभागित्वस्य वर्धमानं महत्त्वं पुनः दृढीकृतवन्तौ। विदेशमन्त्रालयः अवोचत् यत् भारत-जपान्-सम्बन्धस्य विविधपरिमाणेषु प्रगतिं समीक्षितुं संवादः महत्त्वपूर्णः आसीत् इति। श्रीमिसरीवर्यः तस्य समकक्षः च हिंद-प्रशांतक्षेत्रे तस्मात् परं च शांत्यै, समृद्ध्यै. स्थिरतायै च भारत-जापानयोः विशिष्ट-रणनीत्याः वैश्विकसहयोगस्य च वर्धमानस्य महत्वस्य पुष्टिं कृतवन्तौ। विदेशमंत्रालयः प्रोक्तवान् यत् एषा वार्ता भारत-जापानयोः संबंधानां विभिन्नायामेषु प्रगतिं समीक्षितुं सहायिका आसीत् ।

-----------------------------------------------------------

**राज्यसभा-स्थगनम्**

विभिन्नविषयेषु निरन्तरविरोध-प्रदर्शनानन्तरम् अद्य राज्यसभा सम्पूर्ण-दिवसाय स्थगिता। यदा सदनस्य पुनः चर्चासत्रं अपराह्णे द्विवादने समारभत् तदा अध्यक्षपदाधिकारी भुवनेश्वरकलिता सी-बिल इति वस्तुवाहकविधेयकं सदनमध्ये स्थापयितुं प्रयतितवान्, परन्तु कोलाहलकारणेन स्थगितुं बाध्यः अभवत् पूर्वं प्रातः एकादशवादने एआइएडीएमके दलस्य सांसदः एम. धनपालः, आई. एस.इन्बदुरै च शपथवचनं स्वीकृतवन्तौ। उपाध्यक्षः हरिवंशः अवदत् यत् विपक्षिदलेभ्यः षड्विंशति-संख्याकाः स्थगनसूचनाः प्राप्ताः, याः सर्वाः एव अस्वीकृताः।

-----------------------------------------------------------

**चतुरङ्गः-अद्यतनम्**

दिव्या-देशमुखः इत्येषा अद्य FIDE महिला-विश्व-चषके स्वकीयेन विजयेन सह ग्रैंडमास्टर इति सम्मानं अङ्गीकुर्वती चतुर्थभारतीया महिला अभवत् । जॉर्जियायाः बटुमी इत्यत्र FIDE महिला-विश्व-चषकस्य अन्तिमे क्रीडाद्वन्द्वे समकक्षीयां भारतीयां कोनेरु-हम्पी इत्येतां विरुध्य विजयमधिगत्य तया एषा उपलब्धिः सम्प्राप्ता ।

**।।इति वार्ता।।**